ओ३म्

# अथ तृतीयाष्टके पञ्चमोऽध्यायः ॥

ओं विश्वा॑नि देव सवितर्दुरि॒तानि॒ परा॑ सुव । यद्भ॒द्रं तन्न॒ आसु॑व ॥ १ ॥

अथ पञ्चर्चस्य पञ्चमस्य सूक्तस्य वामदेव ऋषिः । वैश्वानरो देवता । १ विराट् त्रिष्टुप् । २ । ५ । ६ । ७ । ८ । ११ निचृत्त्रिष्टुप् । ३ । ४ । ९ । १२ । १३ । १५ त्रिष्टुप्छन्दः । धैवतः स्वरः । १० । १४ भुरिक् पङ्क्तिश्छन्दः । पञ्चमः स्वरः ॥

अथाग्निदृष्टान्तेन राजविषयमाह ॥

अब तृतीयाष्टक में पांचवें अध्याय और चतुर्थमण्डल में पञ्चमसूक्त का आरम्भ है उस के प्रथम मन्त्र में अग्नि के दृष्टान्त से राजविषय को कहते हैं ॥

**वै॒श्वा॒न॒राय॑ मी॒ह्लुषे॑ स॒जोषाः॑ क॒था दा॑शेमा॒ग्नये॑ बृ॒हद्भाः ।**
**अनू॑नेन बृह॒ता व॒क्षथे॒नोप॑ स्तभायदुप॒मिन्न रोधः॑ ॥ १ ॥**

वै॒श्वा॒न॒राय॑ । मी॒ह्लुषे॑ । स॒ऽजोषाः॑ । क॒था । दा॒शे॒म॒ । अ॒ग्नये॑ । बृ॒हत् । भाः ।
अनू॑नेन । बृ॒ह॒ता । व॒क्षथे॑न । उप॑ । स्त॒भा॒य॒त् । उ॒प॒ऽमित् । न । रोधः॑ ॥ १ ॥

पदार्थः—(वैश्वानराय) विश्वेषु नायकाय (मीह्लुषे) सेचकाय (सजोषाः) समानप्रीतिसेवनाः । अत्र वचनव्यत्ययेनैकवचनम् । (कथा) केन प्रकारेण (दाशेम) दद्याम (अग्नये) वह्निवद्वर्त्तमानाय विदुषे राज्ञे (बृहत्) महत् (भाः) यो भाति सः (अनूनेन) न्यूनतारहितेन (बृहता) महता (वक्षथेन) रोषेण (उप) (स्तभायत) स्तभ्नीयात् (उपमित्) य उपमिनोति सः (न) इव (रोधः) रोधनम् ॥१॥

अन्वयः—हे राजन् यस्त्वं बृहद्भा उपमिद्रोधो नानूनेन बृहता वक्षथेन राज्यमुप स्तभायत्तस्मै वैश्वानराय मीह्लुषेऽग्नये सजोषा वयं सुखं कथा दाशेम ॥ १ ॥

भावार्थः—अत्र वाचकलुप्तोपमालङ्कारः—ये सूर्यविद्युद्वत्सद्गुणप्रकाशका जलावरणमिव दुष्टानां निरोधकाः स्वात्मवत्सुखदुःखहानिलाभाञ्जानन्तो राज्यं कुर्वन्ति ते दण्डन्यायं प्रचालयितुं शक्नुवन्ति ॥ १ ॥

पदार्थः—हे राजन् जो आप ( बृहत् ) बड़े ( भाः ) शोभित नापने वाले और ( रोधः ) रोकने को ( उपमित् ) अलग करता है उस के ( न ) समान ( अनूनेन ) न्यूनता से रहित ( बृहता ) बड़े ( वक्षथेन ) क्रोध से राज्य को ( उप,स्तभायत् ) रोकै उस ( वैश्वानराय ) सब में नायक ( मीह्लुसे ) सेचन करने वाले ( अग्नये) अग्नि के सदृश वर्त्तमान विद्वान् राजा के लिये ( सजोषाः ) तुल्य प्रीति के सेवन करने वाले हम लोग सुख को ( कथा ) किस प्रकार से ( दाशेम ) देवैं ॥१॥

भावार्थः—इस मन्त्र में वाचकलुप्तोपमालङ्कार हैः—जो लोग सूर्य और बिजुली के सदृश उत्तम गुणों के प्रकाश करने और जल के रोकने वाले पदार्थ के सदृश दुष्टों के रोकने वाले और अपने सदृश सुख दुःख हानि और लाभ को जानते हुए राज्य करते हैं वे दण्ड और न्याय को चला सके हैं ॥ १ ॥

पुनस्तमेव विषयमाह ॥

फिर उसी विषय को० ॥

**मा निन्दत य इमां मह्यं रातिं देवो ददौ मर्त्याय स्वधावान् ।**
**पाकाय गृत्सो अमृतो विचेता वैश्वानरो नृतमो यह्वो अग्निः ॥२॥**

मा । निन्दत । यः । इमाम् । मह्यम् । रातिम् । देवः । ददौ । मर्त्याय । स्वधाऽवान् । पाकाय । गृत्सः । अमृतः । विऽचेताः । वैश्वानरः । नृऽतमः । यह्वः । अग्निः ॥ २ ॥

पदार्थः—( मा ) ( निन्दत ) ( यः ) ( इमाम् ) ( मह्यम् ) ( रातिम् ) दानम् ( देवः ) दाता ( ददौ ) ददाति ( मर्त्याय ) मनुष्याय ( स्वधावान् ) बह्वन्नाद्यैश्वर्य्यः ( पाकाय ) परिपक्वव्यवहाराय ( गृत्सः ) यो गृणाति स मेधावी ( अमृतः ) मृत्युरहितः ( विचेताः ) विविधानि चेतांसि संज्ञानानि ज्ञापनानि वा यस्य सः ( वैश्वानरः ) विश्वेषु नरेषु प्रकाशमानः ( नृतमः ) अतिशयेन नायको नरोत्तमः ( यह्वः ) महान् ( अग्निः ) सूर्य इव ॥ २ ॥

अन्वयः—हे मनुष्या यः स्वधावानमृतो विचेता वैश्वानरो नृतमो यह्वो गृत्सोऽग्निर्देवः पाकाय मर्त्याय मह्यमिमां रातिं ददौ तं मा निन्दत ॥ २ ॥

भावार्थः—हे राजप्रजाजना योऽग्न्यादिगुणयुक्तः सर्वेभ्यः सुखदाता राजा शुभगुणः स्यात्तस्य निन्दां दुष्टस्य प्रशंसां कदाचिन्मा कुरुत ॥ २ ॥

पदार्थः—हे मनुष्यो ( यः ) जो ( स्वधावान् ) बहुत अन्न आदि ऐश्वर्य्य से युक्त ( अमृतः ) मृत्यु से रहित ( विचेताः ) अनेक प्रकार के अच्छे प्रकार ज्ञान होना वा ज्ञान कराने के प्रकार जिसके ऐसे ( वैश्वानरः ) सम्पूर्ण मनुष्यों में प्रकाशमान ( नृतमः ) अत्यन्त नायक वा मनुष्यों में श्रेष्ठ ( यह्वः ) बड़ा ( गृत्सः ) उपदेशदाता बुद्धिमान् ( अग्निः ) सूर्य्य के समान ( देवः ) देनेवाला पुरुष (पाकाय) परिपक्व व्यवहार वाले ( मर्त्याय, मह्यम् ) मुझ मनुष्य के लिये ( इमाम् ) इस ( रातिम् ) दान को ( ददौ ) देता है उसकी ( मा ) मत ( निन्दत ) निन्दा करो ॥ २ ॥

भावार्थः—हे राजा और प्रजाजनो ! जो अग्नि आदि के गुणों से युक्त और सब के लिये सुख देनेवाला राजा उत्तम गुणवाला होवे उसकी निन्दा और दुष्ट की प्रशंसा कभी मत करो ॥ २ ॥

अथ मेधाविना किं कर्त्तव्यमित्याह ॥

अब मेधावि पुरुष को क्या करना चाहिये इस विषय को अगले मन्त्र में कहते हैं ॥

**साम॑ द्वि॒बर्हा॒ महि॑ ति॒ग्मभृ॑ष्टिः स॒हस्र॑रेता वृष॒भस्तुवि॑ष्मान् ।**
**प॒दं न गोरप॑गूळ्हं विवि॒द्वान॒ग्निर्मह्यं॒ प्रेदु॑ वोचन्मनी॒षाम् ॥ ३ ॥**

साम॑ । द्वि॒ऽबर्हाः॑ । महि॑ । ति॒ग्मऽभृ॑ष्टिः । स॒हस्र॑ऽरेताः । वृ॒ष॒भः । तुवि॑ष्मान् । प॒दम् । न । गोः । अप॑ऽगूळ्हम् । वि॒वि॒द्वान् । अ॒ग्निः । मह्य॑म् । प्र । इत् । ऊं॒ इति॑ । वो॒च॒त् । म॒नी॒षाम् ॥ ३ ॥

पदार्थः—( साम ) सिद्धान्तितं कर्म ( द्विबर्हाः ) द्वाभ्यां विद्याविनयाभ्यां वृद्धः ( महि ) महत् ( तिग्मभृष्टिः ) तिग्मा तीव्रा भृष्टिः परिपाको यस्य सः ( सहस्ररेताः ) अतुलवीर्यः ( वृषभः ) वृषभ इव श्रेष्ठः ( तुविष्मान् ) बहुबलः ( पदम् ) पादचिह्नम् ( न ) इव ( गोः ) धेनोः ( अपगूळ्हम् ) गुप्तम् ( विविद्वान् ) विशेषेण विपश्चित् ( अग्निः ) पावक इव तेजस्वी ( मह्यम् ) जिज्ञासवे (प्र) (इत्) एव (उ) (वोचत्) प्रोच्यात् ( मनीषाम् ) प्रज्ञाम् ॥ ३ ॥

अन्वयः— यो द्विबर्हा तिग्मभृष्टिः सहस्ररेता वृषभ इव तुविष्मानग्निरिव विविद्वान् गोरपगूळ्हं पदं न मह्यं मनीषां महि साम च प्रवोचत्स इदु अस्माभिः सत्कर्त्तव्यः ॥ ३ ॥

भावार्थः—अत्रोपमावाचकलु०—स एव श्रेष्ठो विद्वान् यः सर्वान्प्रमां प्रापयेत्। यथा गोः पदमन्विष्य गां प्राप्नोति तथैव पदार्थविद्या प्राप्तव्या ॥ ३ ॥

पदार्थः—जो ( द्विबर्हाः ) दो अर्थात् विद्या और विनय से वृद्ध ( तिग्मभृष्टिः ) तीव्र परिपाक जिसका ऐसा ( सहस्ररेताः ) परिमाण रहित पराक्रमयुक्त ( वृषभः ) बैल के सदृश श्रेष्ठ ( तुविष्मान् ) बहुत बलयुक्त ( अग्निः ) अग्नि के सदृश तेजस्वी और ( विविद्वान् ) विशेष करके पण्डित ( गोः ) गौ के ( अपगूहळम् ) गुप्त ( पदम् ) पैरों के चिह्न के ( न ) सदृश ( मह्यम् ) मुझ जानने की इच्छा करने वाले के लिये ( मनीषाम् ) बुद्धि और ( महि ) बड़े ( साम ) सिद्धान्तित कर्म को ( प्र, वोचत् ) कहै ( इत्, उ ) फिर वही हम लोगों से सत्कार करने योग्य है ॥ ३ ॥

भावार्थः—इस मन्त्र में उपमा वाचकलु०—वही श्रेष्ठ विद्वान् है कि जो सब के लिये यथार्थज्ञान करावे। जैसे गौ के पैरों के चिह्न को खोज के गौ को प्राप्त होता है वैसे ही पदार्थविद्या प्राप्त करने योग्य है ॥ ३ ॥

अथ सर्वसुखकरराजविषयमाह ॥

अब सब को सुख करने वाले राजविषय को० ॥

**प्र ताँ अ॒ग्निर्ब॑भसत्ति॒ग्मज॑म्भ॒स्तपि॑ष्ठेन शो॒चिषा॒ यः सु॒राधाः॑ ।**
**प्र ये मि॒नन्ति॒ वरु॑णस्य॒ धाम॑ प्रि॒या मि॒त्रस्य॒ चेत॑तो ध्रु॒वाणि॑ ॥ ४ ॥**

प्र । तान् । अ॒ग्निः । ब॒भ॒स॒त् । ति॒ग्मऽज॑म्भः । तपि॑ष्ठेन । शो॒चिषा॑ । यः । सु॒ऽराधाः॑ । प्र । ये । मि॒नन्ति॑ । वरु॑णस्य । धाम॑ । प्रि॒या । मि॒त्रस्य॑ । चेत॑तः । ध्रु॒वाणि॑ ॥ ४ ॥

पदार्थः—( प्र ) ( तान् ) ( अग्निः ) पावक इव ( बभसत् ) दीप्येद्भर्त्सयेत् ( तिग्मजम्भः ) तिग्मानि गात्रविनमनानि यस्य सः ( तपिष्ठेन ) अतिशयेन तापयुक्तेन ( शोचिषा ) तेजसा ( यः ) ( सुराधाः ) शोभनधनः ( प्र ) ( ये ) ( मिनन्ति ) हिंसन्ति ( वरुणस्य ) श्रेष्ठस्य ( धाम ) जन्मस्थाननामानि ( प्रिया ) कमनीयानि ( मित्रस्य ) सख्युः ( चेततः ) संज्ञापकस्य ( ध्रुवाणि ) निश्चलानि दृढानि ॥ ४ ॥

अन्वयः—योऽग्निरिव तिग्मजम्भस्तपिष्ठेन शोचिषा सुराधाः सन् ये चेततो वरुणस्य मित्रस्य प्रिया ध्रुवाणि धाम प्रमिणन्ति तान् प्रबभसत्स एव सर्वस्य सुखकरो जायते ॥ ४ ॥

भावार्थः—अत्र वाचकलु०—यथा प्रदीप्तोऽग्निः प्राप्तशुष्कमार्द्रं च दहति तथैव यः स्वार्थिनः परस्य सुखविनाशकान् हन्ति स प्रशंसितो भवति ॥ ४ ॥

पदार्थः—( यः ) जो ( अग्निः ) अग्नि के सदृश ( तिग्मजम्भः ) तीक्ष्ण शरीर शिथिल करने वाली जम्भवाई वाला ( तपिष्ठेन ) अत्यन्त ताप अर्थात् दीप्तियुक्त ( शोचिषा ) तेज से ( सुराधाः ) उत्तम धन वाले होते हुए ( ये ) जो लोग ( चेततः ) चैतन्य कराने वाले ( वरुणस्य ) श्रेष्ठ ( मित्रस्य ) मित्र के ( प्रिया ) सुन्दर और ( ध्रुवाणि ) निश्चल अर्थात् दृढ़ ( धाम ) जन्मस्थान नामों का ( प्र, मिनन्ति ) नाश करते हैं ( तान् ) उन को ( प्र, बभसत् ) तिरस्कार करै वही सब को सुख करने वाला होता है ॥ ४ ॥

भावार्थः—इस मन्त्र में वाचकलु०—जैसे प्रदीप्त अग्नि प्राप्त हुए शुष्क और गीले पदार्थ को जलाता है वैसे ही जो पुरुष अपने प्रयोजनसाधक स्वार्थी और अन्यपुरुष के सुख नाश करने वालों को नाश करते हैं वह प्रशंसित होता है ॥४॥

अथ राजविषये दण्डविचारमाह ॥

अथ राजविषय में दण्डविचार को० ॥

**अभ्रातरो न योषणो व्यन्तः पतिरिपो न जनयो दुरेवाः । पापासः सन्तो अनृता असत्या इदं पदमजनता गभीरम् ॥ ५ ॥१॥**

अभ्रातरः । न । योषणः । व्यन्तः । पतिऽरिपः । न । जनयः । दुःऽएवाः । पापासः । सन्तः । अनृताः । असत्याः । इदम् । पदम् । अजनत । गभीरम् ॥ ५ ॥ १ ॥

पदार्थः—( अभ्रातरः ) अबन्धुरिव वर्त्तमानाः ( न ) इव ( योषणः ) भार्य्याः ( व्यनतः ) प्राप्नुवन्त्यः ( पतिरिपः ) पत्युर्भूमीः । रिप इति पृथ्वीनाम । निघं० १ । १ । ( न ) इव ( जनयः ) जायाः ( दुरेवाः ) दुर्व्यसनाः ( पापासः ) अधर्माचाराः ( सन्तः ) ( अनृताः ) असत्यवादिनः ( असत्याः ) असत्याचरणाः ( इदम् ) ( पदम् ) ( अजनत ) जनयन्ति । अत्र संहितायामिति दीर्घः ( गभीरम् ) गहनम् ॥ ५ ॥

अन्वयः—येऽनृता असत्या दुरेवाः पापासस्सन्तो दुष्टा अभ्रातरो न योषणः पतिरिपो न व्यन्तो जनय इदं गभीरं पदं दुःखमजनत ते सदैव ताडनीयाः ॥ ५ ॥

भावार्थः--अत्रोपमालं०—हे मनुष्या या स्त्री भ्रातृवदनुकूला नानुकूला शत्रुवद्विरोधिनी ये च घोरपापिनः सर्वेषां पीडकाः स्युस्तान्दूरतस्त्यजत ॥ ५ ॥

पदार्थः—जो ( अनृताः ) मिथ्या बोलने और ( असत्याः ) मिथ्या आचरण करने वाले ( दुरेवाः ) दुष्टव्यसनों से युक्त ( पापासः ) अधर्माचरण करते ( सन्तः ) हुए दुष्ट ( अभ्रातरः ) जैसे बन्धुभिन्न जन ( नः ) वैसे और जैसे ( योषणः ) स्त्रियां ( पतिरिपः ) पति की भूमि को ( न ) वैसे ( व्यन्तः ) प्राप्त हुई ( जनयः ) स्त्रियां (इदम् ) इस ( गभीरम् ) गम्भीर ( पदम् ) स्थान को ( अजनत ) उत्पन्न करती हैं वे सदा ही ताड़न करने योग्य हैं ॥ ५ ॥

भावार्थः—इस मन्त्र में उपमालं०—हे मनुष्यो ! जो स्त्री भाई के सदृश अनुकूल नहीं और जो अनुकूल हो तो शत्रु के सदृश विरोध करने वाली हो और जो घोर पापीजन सब के पीड़ा देने वाले हों उन का दूर से त्याग करो ॥ ५ ॥

अथाध्यापकविषयमाह ॥

अब अध्यापकविषय को० ॥

**इदं मे अग्ने कियते पावकामिनते गुरुं भारं न मन्म । बृहद्दधाथ धृषता गभीरं यह्वं पृष्ठं प्रयसा सप्तधातु ॥ ६ ॥**

इदम् । मे । अग्ने । कियते । पावक । अमिनते । गुरुम् । भारम् । न । मन्म । बृहत् । दधाथ । धृषता । गभीरम् । यह्वम् । पृष्ठम् । प्रयसा । सप्तऽधातु ॥ ६ ॥

पदार्थः—( इदम् ) ( मे ) मह्यम् ( अग्ने ) पावकवद्वर्त्तमान ( कियते ) अल्पसामर्थ्याय ( पावक ) पवित्रकर ( अमिनते ) अहिंसकाय ( गुरुम् ) महान्तम् ( भारम् ) ( न ) इव ( मन्म ) विज्ञानम् ( बृहत् ) वर्द्धकम् ( दधाथ ) धेहि । अत्र वचनव्यत्ययेन बहुवचनम् ( धृषता ) प्रगल्भेन सह ( गभीरम् ) ( यह्वम् ) महत् ( पृष्ठम् ) प्रच्छनीयम् ( प्रयसा ) प्रीतेन ( सप्तधातु ) सुवर्णादयस्सप्तधातवो यस्मिन् ॥ ६ ॥

अन्वयः—हे पावकाग्ने त्वं कियतेऽमिनते मे गुरुं भारं न मन्म धृषता प्रयसेदं बृहद्गभीरं पृष्ठं यह्वं सप्तधातु धनं दधाथ ॥ ६ ॥

भावार्थः—अत्रोपमालं०—येऽल्पज्ञा विद्यार्थिनश्च ज्ञानिनो विदुषः सकाशाद्विज्ञानं धनसाधनं च याचन्ते ते विद्वांसो जायन्ते ॥ ६ ॥

पदार्थः—हे ( पावक ) पवित्र करने वाले ( अग्ने ) अग्नि के सदृश वर्त्तमान आप ( कियते ) थोड़े सामर्थ्य से युक्त ( अमिनते ) नहीं हिंसा करने वाले ( मे ) मेरे लिये ( गुरुम् ) बड़े ( भारम् ) भार के ( न ) सदृश ( मन्म ) विज्ञान को तथा ( धृषता ) ढीठ और ( प्रयसा ) प्रसन्न के साथ ( इदम् ) इस ( बृहत् ) बढ़ाने वाले ( गभीरम् ) गम्भीर ( पृष्ठम् ) पूछने योग्य ( यह्वम् ) बड़े ( सप्तधातु ) सुवर्ण आदि सातों धातु जिस में ऐसे धन को ( दधाथ ) धारण कीजिये ॥ ६ ॥

भावार्थः—इस मन्त्र में उपमालं०—जो अल्पज्ञ और विद्यार्थी जन ज्ञानी विद्वान् के समीप से विज्ञान और धन के साधन की याचना करते हैं वे विद्वान् होते हैं ॥ ६ ॥

अथ विवाहपरत्वेनोपदेशविषयमाह ॥

अब विवाहपरता से उपदेशविषय को० ॥

**तमिन्न्वे३व स॒म॒ना स॑मा॒नम॒भि क्रत्वा॑ पुन॒ती धी॒तिर॑श्याः। स॒सस्य॒ चर्म॒न्नधि॒ चारु॒ पृश्ने॒रग्रे॑ रु॒प आरु॑पितं॒ जबा॑रु ॥ ७ ॥**

तम् । इत् । नु । एव । स॒म॒ना । स॒मा॒नम् । अ॒भि । क्रत्वा॑ । पु॒न॒ती । धी॒तिः । अ॒श्याः॒ । स॒सस्य॑ । चर्म॑न् । अधि॑ । चारु॑ । पृश्नेः॑ । अग्रे॑ । रु॒पः । आरु॑पितम् । जबा॑रु ॥ ७ ॥

पदार्थः—( तम् ) ( इत् ) अपि ( नु ) ( एव ) ( समना ) सदृशी ( समानम् ) तुल्यं पतिम् ( अभि ) ( क्रत्वा ) प्रज्ञया ( पुनती ) पित्रा पवित्रयन्ती ( धीतिः ) शुभगुणधारिका ( अश्याः ) प्राप्नुयाः ( ससस्य ) स्वपतः ( चर्मन् ) चर्मणि ( अधि ) उपरि ( चारु ) सुन्दरम् ( पृश्नेः ) अन्तरिक्षस्य ( अग्रे ) पुरस्तात् ( रुपः ) आरोपणकर्तुः । अत्र कर्त्तरि क्विप् । ( आरुपितम् जबारु ) जवमानमारूढम् ॥ ७ ॥

अन्वयः—हे कन्ये यस्य ससस्य चर्मन् चारु जबार्वारुपितं पृश्नेरग्र्यस्ति तदग्रेऽधिरुपः क्रत्वा पुनती धीतिः समना सती तमिदेव समानं पतिं न्वेवाश्याः ॥ ७ ॥

भावार्थः—यदि कन्या स्वसदृशं वरं ब्रह्मचारी स्वतुल्यां कन्याञ्चोपयच्छेत्तर्ह्यन्तरिक्षस्य मध्य ईश्वरेण स्थापितः सविता चन्द्रो नक्षत्राणीव सुशोभेते ॥ ७ ॥

पदार्थः—हे कन्ये जिस ( ससस्य ) शयन करते हुए के ( चर्मन् ) चमड़े में ( चारु ) सुन्दर ( जवारु ) वेग करता हुआ वा आरूढ़ ( आरुपितम् ) आरोपण किया गया वा जो ( पृश्नेः ) अन्तरिक्ष के ( अभि ) सब ओर है उसके ( अग्रे ) आगे ( अधि, रुपः ) अधिरोपण करनेवाले की ( क्रत्वा ) उत्तम बुद्धि से ( पुनती ) पिताके सम्बधसे पवित्र करती हुई (धीतिः) उत्तम गुणों के धारण करने वाली ( समना ) तुल्य हुई ( तम् ) ( इत् ) उसी ( समानम् ) समान पति को ( नु, एव ) शीघ्र ही ( अश्याः ) प्राप्त हो ॥ ७ ॥

भावार्थः—जो कन्या अपने समान वर और ब्रह्मचारी अपने तुल्य कन्या के साथ विवाह करे तो अन्तरिक्ष के मध्य में ईश्वर से स्थापित सूर्य्य चन्द्रमा और नक्षत्रों के तुल्य शोभित होते हैं ॥ ७ ॥

अथ प्रच्छक विषयमाह ॥

अब प्रच्छक विषयको अगले मन्त्र में कहते हैं ॥

**प्रवाच्यं॒ वच॑सः॒ किं मे॑ अ॒स्य गुहा॑ हि॒तमुप॑ नि॒णिग्व॑दन्ति ।**
**यदु॒स्रिया॑णा॒मप॒ वारि॑व॒ व्रन्पाति॑ प्रि॒यं रु॒पो अग्रं॑ प॒दं वेः ॥ ८ ॥**

प्रऽवाच्य॑म् । वच॑सः । किम् । मे॒ । अ॒स्य । गुहा॑ । हि॒तम् । उप॑ । नि॒णिक् । व॒दन्ति॒ । यत् । उ॒स्रिया॑णाम् । अप॑ । वाःऽइ॑व । व्रन् । पाति॑ । प्रि॒यम् । रु॒पः । अग्र॑म् । प॒दम् । वेरि॑ति॒ वेः ॥ ८ ॥

पदार्थः—( प्रवाच्यम् ) प्रकर्षेण वक्तुं योग्यम् ( वचसः ) वचनस्य ( किम् ) ( मे ) मम ( अस्य ) जनस्य ( गुहा ) बुद्धौ ( हितम् ) स्थितम् ( उप ) ( निणिक् ) नितरां शुन्धति ( वदन्ति ) ( यत् ) ( उस्रियाणाम् ) गवाम् ( अप ) ( वारिव ) जलमिव ( व्रन् ) आपवृणोति ( पाति ) ( प्रियम् ) कमनीयम् ( रुपः ) पृथिव्याः । रुप इति पृथिवीनाम । निघं० १ । १ । ( अग्रम् ) ( पदम् ) ( वेः ) पक्षिणः ॥ ८ ॥

अन्वयः—ये मेऽस्य च वचसो गुहा हितं प्रवाच्यं निणिक्किमुपवदन्ति यदुस्रियाणां वारिव वेरग्रं पदमिव रुपः प्रियमपव्रन् कश्चैतत्पाति ॥ ८ ॥

भावार्थः—हे विद्वांसो ममास्य च जनस्य बुद्धौ स्थितं चेतनं किमस्ति कीदृगस्ति यत्पशूनां पालकं जलमिव रक्षति सर्वेभ्यः प्रियं दृश्यते । यदाऽऽकाशे पक्षिणः पदमिव गुप्तमस्ति तद्विज्ञानायाऽस्मान्प्रति भवन्तः किं ब्रुवन्तु ॥ ८ ॥

पदार्थः—जो ( मे ) मेरे और ( अस्य ) इस जन के ( वचसः ) वचन के सम्बन्ध में ( गुहा ) बुद्धि में ( हितम् ) स्थित ( प्रवाच्यम् ) प्रकर्षता से कहने योग्य ( निणिक् ) अत्यन्त शुद्ध करने वाले को ( किम् ) क्या ( उप,वदन्ति ) समीप में कहते हैं ( यत् ) जो ( उस्रियाणाम् ) गौओं के ( वारिव ) जल के सदृश वा ( वेः ) पक्षी के ( अग्रम् ) ऊंचे ( पदम् ) स्थान के सदृश ( रुपः ) पृथिवी के ( प्रियम् ) सुन्दर भाग को ( अप, व्रन् ) घेरता है कौन इन दोनों को ( पाति ) पालन करता है ॥ ८ ॥

भावार्थः—हे विद्वानो ! मेरी और इस जन की बुद्धि में वर्त्तमान चेतन क्या और कैसा है जो पशुओं के पालन करने वाला जल के सदृश रक्षा करता और सब से प्रिय देख पड़ता है । और जो आकाश में पक्षी के पैर के सदृश गुप्त है उस के विज्ञान के लिये हम लोगों के प्रति आप लोग क्या कहते हो ॥ ८ ॥

अथ समाधातृविषयमाह ॥

अब समाधाता के वि० ॥

**इदमु त्यन्महि महामनीकं यदुस्रिया सचत पूर्व्यं गौः । ऋतस्य पदे अधि दीद्यानं गुहा रघुष्यद्रघुयद्विवेद ॥ ९ ॥**

इदम् । ऊं इति । त्यत् । महि । महाम् । अनीकम् । यत् । उस्रिया । सचत । पूर्व्यम् । गौः । ऋतस्य । पदे । अधि । दीद्यानम् । गुहा । रघुऽस्यत् । रघुऽयत् । विवेद ॥ ९ ॥

पदार्थः—( इदम् ) ( उ ) ( त्यत् ) तत् ( महि ) महत् ( महाम् ) महताम् । अत्र छान्दसो वर्णलोपो वेति तलोपः । ( अनीकम् ) सैन्यमिव ( यत् ) ( उस्रिया ) क्षीरादिप्रदा ( सचत ) प्राप्नुत ( पूर्व्यम् ) पूर्वैर्निष्पादितम् ( गौः ) ( ऋतस्य ) सत्यस्य ( पदे ) स्थाने ( अधि ) ( दीद्यानम् ) ( गुहा ) बुद्धौ ( रघुष्यत् ) सद्यः स्यन्दमानम् ( रघुयत् ) सद्योगन्त्री ( विवेद ) वेत्ति ॥ ९ ॥

अन्वयः—हे जिज्ञासवो यन्महामनीकं महि ऋतस्य पदे यद्दीद्यानं गुहा रघुष्यत्पूर्व्यं रघुयद्विवेद त्यदिदमु उस्रिया गौरिवाधि यूयं सचत ॥ ९ ॥

भावार्थः—हे श्रोतारो जना यद्बुद्धिप्रेरकं मन्दशीघ्रगामि सत्यस्य परमेश्वरस्य मध्ये प्रकाशमानं बलिष्ठं सैन्यमिव वीर्यवद्वत्सं सुखयन्ती गौरिव सुखप्रदं वस्त्वस्ति तदेव युष्माकं स्वरूपमस्ति ॥ ९ ॥

पदार्थः—हे जिज्ञासुजनो ( यत् ) जो ( महाम् ) बड़ों की ( अनीकम् ) सेना के सदृश ( महि ) बड़ा वा ( ऋतस्य ) सत्य के ( पदे ) स्थान में जो ( दीद्यानम् ) प्रकाशित होता हुआ विद्यमान है उस को ( गुहा ) बुद्धि में ( रघुष्यत् ) शीघ्र हिलते हुए के समान ( पूर्व्यम् ) पूर्वजनों से उत्पन्न किये गए के समान ( रघुयत् ) शीघ्र जाने वाली ( विवेद ) जानती है ( त्यत्, इदम्, उ ) उस ही ( उस्रिया ) दुग्ध आदि की देने वाली ( गौः ) गौ के सदृश ( अधि ) अधिक आप लोग ( सचत ) प्राप्त हूजिये ॥ ९ ॥

भावार्थः—हे श्रोताजनो ! जो बुद्धि की प्रेरणा करने मन्द और शीघ्र चलने वाला सत्य परमेश्वर के मध्य में प्रकाशमान बलिष्ठ वाज पक्षी के सदृश पराक्रम वाले बछड़े को सुख देती हुई गौ के सदृश सुख देने वाला वस्तु है वही आप लोगों का स्वरूप है ॥ ९ ॥

पुनस्तमेव विषयमाह ॥

फिर उसी विषय को० ॥

**अध द्युतानः पित्रोः सचासामनुत गुह्यं चारु पृश्नेः । मातुष्पदे परमे अन्ति षद्गोर्वृष्णः शोचिषः प्रयतस्य जिह्वा ॥ १० ॥ २ ॥**

अध । द्युतानः । पित्रोः । सचा । आसा । अमनुत । गुह्यम् । चारु । पृश्नेः । मातुः । पदे । परमे । अन्ति । सत् । गोः । वृष्णः । शोचिषः । प्रऽयतस्य । जिह्वा ॥ १० ॥ २ ॥

पदार्थः—( अध ) अथ ( द्युतानः ) प्रकाशमानः ( पित्रोः ) जनकयोः ( सचा ) सत्येन ( आसा ) आस्येन ( अमनुत ) विजानीत ( गुह्यम् ) गुप्तम् ( चारु ) सुन्दरम् ( पृश्नेः ) अन्तरिक्षस्य मध्ये ( मातुः ) मातृवद्वर्त्तमानस्य ( पदे ) प्रापणीये ( परमे ) उत्कृष्टे ( अन्ति ) समीपे ( सत् ) वर्त्तमानम् ( गोः ) ( वृष्णः ) वर्षकस्य ( शोचिषः ) प्रकाशमानस्य ( प्रयतस्य ) प्रयत्नं कुर्वतः ( जिह्वा ) वाणी ॥ १० ॥

अन्वयः—हे जिज्ञासवोऽध यः पित्रोर्द्युतानः सचासा परमे मातुष्पदेऽन्ति सद्गोर्वृष्ण इव शोचिषः प्रयतस्य जिह्वेव यत्पृश्नेश्चारु गुह्यमस्ति तज्जीवस्वरूपममनुत ॥ १० ॥

भावार्थः—यथा द्यावापृथिव्योर्मध्ये वर्त्तमानस्सूर्य्यः सुशोभितोऽस्ति यथा विदुषो वाणी विद्याप्रकाशिका वर्तते यथाऽन्तरिक्षं कस्मादपि दूरे न भवति तथैव स्वात्मवस्तु परमात्मा च सन्निकटे वर्त्तत इति वेदनीयम् ॥ १० ॥

पदार्थः—हे जिज्ञासुजनो ! ( अध ) इस के अनन्तर जो ( पित्रोः ) माता और पिता की उत्तेजना से ( द्युतानः ) प्रकाशमान ( सचा ) सत्य ( आसा ) मुख से ( परमे ) उत्तम ( मातुः ) माता के सदृश वर्त्तमान के ( पदे ) प्राप्त होने योग्य स्थान में ( अन्ति ) समीप ( सत् ) वर्त्तमान ( गोः ) गौ और ( वृष्णः ) वृष्टि करने वाले के सदृश ( शोचिषः ) प्रकाशमान ( प्रयतस्य ) प्रयत्न करते हुए की ( जिह्वा ) वाणी के सदृश जो ( पश्वेः ) अन्तरिक्ष के मध्य में ( चारु ) सुन्दर ( गुह्यम् ) गुप्त है उस जीवस्वरूप को ( अमनुत ) जानिये ॥ १० ॥

भावार्थः—जैसे अन्तरिक्ष और पृथिवी के मध्य में वर्त्तमान सूर्य्य उत्तम प्रकार शोभित है और जैसे विद्वान् की वाणी विद्या का प्रकाश करने वाली है और जैसे अन्तरिक्ष किसी से भी दूर नहीं है वैसे ही उत्तम अपना आत्मारूप वस्तु और परमात्मा समीप में वर्त्तमान है ऐसा जानना चाहिये ॥ १० ॥

पुनस्तमेव विषयमाह ॥

फिर उसी विषय को अगले मन्त्र में कहते हैं ॥

**ऋतं वोचे नमसा पृच्छ्यमानस्तवाशसा जातवेदो यदीदम् ।**
**त्वमस्य क्षयसि यद्ध विश्वं दिवि यदु द्रविणं यत्पृथिव्याम् ॥ ११ ॥**

ऋतम् । वोचे । नमसा । पृच्छ्यमानः । तव । आऽशसा । जातऽवेदः । यदि । इदम् । त्वम् । अस्य । क्षयसि । यत् । ह । विश्वम् । दिवि । यत् । ऊँऽइति । द्रविणम् । यत् । पृथिव्याम् ॥ ११ ॥

पदार्थः—( ऋतम् ) सत्यम् ( वोचे ) वदेयमुपदिशेयं वा ( नमसा ) सत्कारेण ( पृच्छ्यमानः ) ( तव ) ( आशसा ) समन्तात्प्रशंसितेन ( जातवेदः ) जातप्रज्ञान ( यदि ) चेत् ( इदम् ) ( त्वम् ) ( अस्य ) ( क्षयसि ) निवससि ( यत् ) ( ह ) किल ( विश्वम् ) सर्वम् ( दिवि ) प्रकाशमाने परमात्मनि सूर्य्ये वा ( यत् ) ( उ ) ( द्रविणम् ) द्रव्यम् ( यत् ) ( पृथिव्याम् ) ॥ ११ ॥

अन्वयः—हे जातवेदो यदि त्वं यद्ध दिवि विश्वं द्रविणं यत्पृथिव्यां यदु वाय्वादिषु वर्त्तते यत्र त्वं क्षयसि तस्यास्य तवाऽऽशसा नमसा पृच्छ्यमानोऽहं तदीदमृतं त्वां प्रतिवोचे ॥ ११ ॥

भावार्थः—हे मनुष्या यद् ब्रह्म सर्वत्र व्याप्तमस्ति यत्र सर्वं वसति तत्सत्यस्वरूपं युष्मान्प्रत्यहमुपदिशामि तदेवोपाध्वम् ॥ ११ ॥

पदार्थः—हे ( जातवेदः ) ज्ञानसे विशिष्ट ( यदि ) यदि आप ( यत् ) जो ( ह ) निश्चयकर ( दिवि ) प्रकाशमान परमात्मा वा सूर्य्य में ( विश्वम् ) सम्पूर्ण ( द्रविणम् ) द्रव्य और ( यत् ) जो ( पृथिव्याम् ) पृथिवी में ( यत् ) जो ( उ ) और वायु आदि में वर्त्तमान है और जिसमें ( त्वम् ) आप ( क्षयसि ) रहते हो उस ( अस्य ) इन ( तव ) आपके ( आशसा ) सब प्रकार प्रशंसित ( नमसा ) सत्कार से ( पृच्छ्यमानः ) पूंछा गया मैं तो ( इदम् ) इस ( ऋतम् ) सत्य को आपके प्रति ( वोचे ) कहूं वा उपदेश करूं ॥ ११ ॥

भावार्थः—हे मनुष्यो ! जो ब्रह्म सब स्थान में व्याप्त है और जिसमें सम्पूर्ण पदार्थ वसते हैं उस सत्यस्वरूप का आप लोगों के प्रति मैं उपदेश करता हूं उसी की उपासना करो ॥ ११ ॥

पुनः प्रच्छकविषयमाह ॥

फिर प्रच्छकविषय को० ॥

**किं नो॑ अस्य द्रवि॑णं॒ कद्ध॒ रत्नं॒ वि नो॑ वोचो जातवेदश्चिकि॒त्वान् । गुहाध्व॑नः पर॒मं यन्नो॑ अस्य रेकु॑ प॒दं न नि॑दा॒ना अग॑न्म ॥१२॥**

किम् । नः॒ । अस्य । द्रवि॑णम् । कत् । ह॒ । रत्न॑म् । वि । नः॒ । वो॒चः॒ । जा॒त॒ऽवे॒दः॒ । चि॒कि॒त्वान् । गुहा॑ । अध्व॑नः । प॒र॒मम् । यत् । नः॒ । अ॒स्य । रेकु॑ । प॒दम् । न । नि॒दा॒नाः । अग॑न्म ॥ १२ ॥

पदार्थः—( किम् ) प्रश्ने ( नः ) अस्माकम् ( अस्य ) संसारस्य मध्ये ( द्रविणम् ) यशः ( कत् ) कदा (ह) किल ( रत्नम् ) धनम् ( वि ) ( नः ) अस्मान् (वोचः) उपदिशेः ( जातवेदः ) जातविद्य ( चिकित्वान् ) विवेकी ( गुहा ) बुद्धेः ( अध्वनः ) मार्गस्य ( परमम् ) प्रकृष्टं प्रापणीयम् ( यत् ) ( नः ) अस्माकम् ( अस्य ) (रेकु ) शङ्कितम् ( पदम् ) प्रापणीयम् (न) इव ( निदानाः ) निन्दां कुर्वाणाः ( अगन्म ) ॥१२॥

अन्वयः—हे जातवेदश्चिकित्वाँस्त्वमस्य नः किं द्रविणं किं रत्नमस्तीति नः कद्ध विवोचः । यद्गुहाऽध्वनः परमं प्राप्ताश्नोऽस्मान् रेकु पदं न नोऽस्मान्निदाना अस्य संसारस्य मध्ये स्युस्तान्विहायाऽगन्म तत्किमिति ॥ १२ ॥

भावार्थः—अत्रोपमालं०—हे विद्वांसोऽस्मासु किं यशः किं रमणीयं वस्तु के चाऽस्माकं निन्दकाः किं च शङ्कनीयं वस्तु किं च प्रापणीयं पदमस्तीत्युत्तराणि ब्रूत ॥ १२ ॥

पदार्थः—हे ( जातवेदः ) विद्यायुक्त ( चिकित्वान् ) विचारशील आप ( अस्य ) इस संसार में ( नः ) हम लोगों का ( किम् ) क्या ( द्रविणम् ) यश और ( किम् ) क्या ( रत्नम् ) धन है ऐसा ( नः ) हम लोगों को ( कत्, ह ) कभी ( वि, वोचः ) उपदेश कीजिये ( यत् ) जो ( गुहा ) बुद्धि के ( अध्वनः ) मार्ग के ( परमम् ) उत्तम प्राप्त होने योग्य को प्राप्त हुए ( नः ) हम लोगों को ( रेकु ) शङ्कायुक्त ( पदम् ) प्राप्त होने योग्य स्थान के ( न ) तुल्य ( नः ) हम लोगों की ( निदानाः ) निन्दा करते हुए ( अस्य ) इस संसार के मध्य में हों उन को त्याग के ( अगन्म ) प्राप्त हुए वह क्या है ॥ १२ ॥

भावार्थः—इस मन्त्र में उपमालं०—हे विद्वानो ! हम लोगों में क्या यश क्या सुन्दर वस्तु और कौन लोग हम लोगों की निन्दा करने वाले और क्या शङ्का करने योग्य वस्तु और क्या प्राप्त होने योग्य स्थान है इन के उत्तर कहो ॥ १२ ॥

पुनस्तमेव विषयमाह ॥

फिर उसी विषय को० ॥

**का मर्यादा वयुना कद्ध वाममच्छा गमेम रघवो न वाजम् ।**
**कदा नो देवीरमृतस्य पत्नीः सूरो वर्णेन ततनन्नुषासः ॥ १३ ॥**

का । मर्यादा । वयुना । कत् । ह । वामम् । अच्छ । गमेम । रघवः । न । वाजम् । कदा । नः । देवीः । अमृतस्य । पत्नीः । सूरः । वर्णेन । ततनन् । उषसः ॥ १३ ॥

पदार्थः—( का ) ( मर्यादा ) ( वयुना ) कर्माणि ( कत् ) कदा ( ह ) खलु ( वामम् ) प्रशस्तवस्तु ( अच्छ ) सम्यक् । अत्र संहितायामिति दीर्घः । ( गमेम )

प्राप्नुयाम ( रघवः ) सद्यःकारिणः ( न ) इव ( वाजम् ) विज्ञानम् ( कदा ) ( नः ) अस्मान् ( देवीः ) देदीप्यमानाः ( अमृतस्य ) नाशरहितस्य ( पत्नीः ) स्त्रीवद्वर्त्तमानाः ( सूरः ) सूर्य्यः ( वर्णेन ) ( ततनन् ) तनिष्यन्ति ( उषासः ) प्रभातान् ॥ १३ ॥

**अन्वयः**—हे विद्वांसो नोऽस्माकं का मर्य्यादा कानि वयुना रघवो वाजं वामं कद्धाच्छगमेम कदा सूरोऽमृतस्य देवीः पत्नीरुषासो न इव वर्णेन ततनन् ॥ १३ ॥

**भावार्थः**—अत्रोपमालं०—मनुष्या आप्तविद्वांसं मनुष्येण कर्त्तव्यानि कर्माणि प्रापणीयं पदं पृच्छेयुर्भवान् सूर्य्ये प्रातर्वेलामिवाऽस्मान् कदा विदुषः सम्पादयिष्यतीति पृच्छेयुः ॥ १३ ॥

**पदार्थः**—हे विद्वानो ( नः ) हम लोगों की ( का ) कौन ( मर्य्यादा ) प्रतिष्ठा और कौन ( वयुना ) कर्म्म हम लोग ( रघवः ) शीघ्र करने वालों के ( वाजम् ) विज्ञान और ( वामम् ) उत्तम वस्तु को ( कत् ह ) कभी ( अच्छ ) उत्तम प्रकार ( गमेम ) प्राप्त होवें और ( कदा ) कब ( सूरः ) सूर्य्य ( अमृतस्य ) नाशरहित काल की ( देवीः ) प्रकाशमान ( पत्नीः ) स्त्रियों के सदृश वर्त्तमान ( उषासः ) प्रातर्वेलाओं के ( न ) सदृश आप ( वर्णेन ) तेज से ( ततनन् ) विस्तृत करेंगे ॥ १३ ॥

**भावार्थः**—इस मंत्र में उपमालं०—मनुष्य लोग यथार्थवादी विद्वान् से मनुष्य के करने योग्य कर्म्मों और प्राप्त होने योग्य स्थान को पूछें कि आप सूर्य्य में प्रातःकाल के सदृश हम लोगों को कब विद्वान् करोगे ऐसा पूछें ॥ १३ ॥

**अथ समाधातृविषयमाह ॥**

अब समाधाता के विषय को अगले० ॥

**अनिरेण वचसा फल्ग्वेन प्रतीत्येन कृधुनातृपासः । अधा ते अग्ने । किमिहा वदन्त्यनायुधास आसता सचन्ताम् ॥ १४ ॥**

अनिरेण । वचसा । फल्ग्वेन । प्रतीत्येन । कृधुना । अतृपासः । अध । ते । अग्ने । किम् । इह । वदन्ति । अनायुधासः । असता । सचन्ताम् ॥ १४ ॥

**पदार्थः**—( अनिरेण ) अरमणीयेन ( वचसा ) वचनेन ( फल्ग्वेन ) महता ( प्रतीत्येन ) प्रतीतौ भवेन ( कृधुना ) ह्रस्वेनाऽल्पेन ( अतृपासः ) अतृप्ताः सन्तः

( अध ) अथ । अत्र निपातस्य चेति दीर्घः ( ते ) ( अग्ने ) विद्वन् ( किम् ) ( इह ) अस्मिन् संसारे जन्मनि वा । अत्र निपातस्य चेति दीर्घः ( वदन्ति ) ( अनायुधासः ) अविद्यमानायुधाः ( आसता ) अवर्त्तमानेन । अत्रान्येषामपीत्याद्यचो दीर्घः ( सचन्ताम् ) प्राप्नुवन्तु ॥ १४ ॥

**अन्वयः**—हे अग्ने विद्वन् येऽनिरेण प्रतीत्येन फल्वेन कृधुना वचसाऽतृपास आसताऽनायुधास इवेह किं वदन्त्यध ते किं सचन्तामित्यस्योत्तरं ब्रूत ॥ १४ ॥

**भावार्थः**—यदि श्रोतार उपदेशेन प्राप्तोत्तराः सन्तुष्टा न स्युस्ते तावत्पृच्छन्तु यदा प्राप्तसमाधानाः स्युस्तदा तत्कर्म्मारभन्ताम् ॥ १४ ॥

**पदार्थः**—हे ( अग्ने ) विद्वान् पुरुष जो ( अनिरेण ) नहीं रमने योग्य ( प्रतीत्येन ) प्रतीति में प्रसिद्ध हुए ( फल्वेन ) बड़े ( कृधुना ) छोटे ( वचसा ) वचन से ( अतृपासः ) अतृप्त होते हुए ( आसता ) नहीं वर्त्तमान बल आदि से ( अनायुधासः ) विना शस्त्र अस्त्र वालों के सदृश ( इह ) इस संसार वा इस जन्म में ( किम् ) क्या ( वदन्ति ) कहते हैं ( अध ) इसके अनन्तर ( ते ) आपके लिए किसे ( सचन्ताम् ) प्राप्त होवें इसका उत्तर कहिये ॥ १४ ॥

**भावार्थः**—जो श्रोता लोग उपदेश से उत्तर को प्राप्त हुए सन्तुष्ट न होवें वे तब तक पूंछें जब कि समाधान को प्राप्त होवें तब उस कर्म का आरम्भ करें ॥ १४ ॥

पुनस्तमेव विषयमाह ॥

फिर उसी विषय को० ॥

**अस्य श्रिये समिधानस्य वृष्णो वसोरनीकं दम आ रुरोच।**
**रुशद्वसानः सुदृशीकरूपः क्षितिर्न राया पुरुवारो अद्यौत् ॥१५॥३॥**

अस्य । श्रिये । सम्ऽइधानस्य । वृष्णः । वसोः । अनीकम् । दमे । आ । रुरोच । रुशत् । वसानः । सुदृशीकऽरूपः । क्षितिः । न । राया । पुरुऽवारः । अद्यौत् ॥ १५ ॥ ३ ॥

**पदार्थः**—( अस्य ) वर्त्तमानस्य ( श्रिये ) शोभनायै लक्ष्म्यै वा ( समिधानस्य ) देदीप्यमानस्य ( वृष्णः ) बलिष्ठस्य ( वसोः ) वासयितुः ( अनीकम् ) सैन्यम् ( दमे ) गृहे ( आ ) समन्तात् ( रुरोच ) रोचते ( रुशत् ) सुन्दरं रूपम् ( वसानः ) प्राप्तः

( सुदृशीकरूपः ) सुष्ठु दर्शनीयस्वरूपः ( क्षितिः ) पृथिवी ( न ) इव ( राया ) धनेन ( पुरुवारः ) बहुभिर्वरणीयस्वरूपः ( अद्यौत् ) प्रकाशते ॥ १५ ॥

अन्वयः—यो रुशद्वसानः सुदृशीकरूपः पुरुवारो राया क्षितिर्नाद्यौत् यस्य समिधानस्य वृष्णो वसो राज्ञो दमे श्रियेऽनीकमारुरोच । तस्या अस्य सर्वाणि समाधानानि सुखानि च भवन्ति ॥ १५ ॥

भावार्थः—अत्रोपमालं०—ये सुरूपवन्तः पृथिवीवत् क्षमादिगुणा बहुप्रतिष्ठिताश्चक्रवर्त्तिराज्यश्रिया सुशोभिताः सन्तः सुशिक्षितां महाबलवतीं महतीं सेनामुन्नयन्ति तेषामेव चक्रवर्तिराज्यं संभाव्यते नेतरेषामिति ॥ १५ ॥

अत्राऽग्निमेधाविराजाऽध्यापकोपदेशकप्रच्छकसमाधातृगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या ॥

इति पञ्चमं सूक्तं तृतीयो वर्गश्च समाप्तः ॥

पदार्थः—जो ( रुशत् ) सुन्दर रूप को ( वसानः ) प्राप्त ( सुदृशीकरूपः ) उत्तम प्रकार देखने योग्य स्वरूप से युक्त ( पुरुवारः ) सब से स्वीकार करने योग्य स्वरूप से शोभित तथा ( राया ) धन से ( क्षितिः ) पृथिवी के ( न ) समान ( अद्यौत् ) प्रकाशित होता है जिस ( समिधानस्य ) प्रकाशमान ( वृष्णः ) बलिष्ठ ( वसोः ) वसाने वाले राजा के ( दमे ) गृह में ( श्रिये ) शोभा वा लक्ष्मी के लिये ( अनीकम् ) सेना ( आ ) सब प्रकार ( रुरोच ) सुन्दर है उस सेना के और ( अस्य ) इस वर्त्तमान राजा के संपूर्ण समाधान और सुख होते हैं ॥ १५ ॥

भावार्थः—इस मंत्र में उपमालं०—जो अच्छे रूपवान् पृथिवी के सदृश क्षमा आदि गुण वाले और प्रतिष्ठित चक्रवर्ती राजाओं की लक्ष्मी से शोभित हुए उत्तम प्रकार शिक्षित बड़ी बलवती बड़ी सेना को बढ़ाते हैं उनका ही चक्रवर्ती राज्य संभावित होता है औरों का नहीं ॥ १५ ॥

इस सूक्त में बुद्धिमान् राजा अध्यापक उपदेशक प्रश्नकर्त्ता और समाधानकर्त्ता के गुण वर्णन करने से इस सूक्त के अर्थ की इस से पूर्व सूक्त के अर्थ के साथ सङ्गति जानना चाहिये ॥

यह पांचवां सूक्त और तीसरा वर्ग समाप्त हुआ ॥

ओ३म्

अथैकादशर्चस्य षष्ठस्य सूक्तस्य वामदेव ऋषिः। अग्निर्देवता। १। ३। ५। ८। ११ विराट् त्रिष्टुप्। ७ निचृत्त्रिष्टुप्। १० त्रिष्टुप् छन्दः। धैवतः स्वरः। २। ४। ९ भुरिक् पङ्क्तिः। ६ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वद्विषयमाह॥

अब ग्यारह ऋचा वाले छठे सूक्त का प्रारम्भ है उसके प्रथम मन्त्र में विद्वानों के विषय को कहते हैं॥

ऊर्ध्व ऊ षु णो अध्वरस्य होतरग्ने तिष्ठ देवताता यजीयान्।
त्वं हि विश्वमभ्यसि मन्म प्र वेधसश्चित्तिरसि मनीषाम्॥ १॥

ऊर्ध्वः। ऊँ इति। सु। नः। अध्वरस्य। होतः। अग्ने। तिष्ठ। देवऽताता। यजीयान्। त्वम्। हि। विश्वम्। अभि। असि। मन्म। प्र। वेधसः। चित्। तिरसि। मनीषाम्॥ १॥

पदार्थः—(ऊर्ध्वः) उपर्य्यधिष्ठाता (उ) वितर्के (सु) शोभने (नः) अस्माकम् (अध्वरस्य) अहिंसनीयस्य धर्म्यस्य व्यवहारस्य (होतः) दातः (अग्ने) पावक इव विद्वन् (तिष्ठ) (देवताता) देवतातौ (यजीयान्) अतिशयेन यष्टा (त्वम्) (हि) यतः (विश्वम्) सर्वं जगत् (अभि) आभिमुख्ये (असि) भवसि (मन्म) विज्ञानम् (प्र) (वेधसः) मेधाविनो विपश्चितः (चित्) एव (तिरसि) तरसि (मनीषाम्) प्रज्ञाम्॥ १॥

अन्वयः—हे होतरग्ने त्वं हि देवताता यजीयान्नोऽध्वरस्योर्द्ध्वो वेधसो विश्वं मन्माऽभ्यसि मनीषां चित् तिरसि स उ सुप्रतिष्ठ॥ १॥

भावार्थः—हे मनुष्या ये विदुषां सकाशाद्विद्याः प्राप्य सर्वस्य रक्षकाः प्रज्ञाप्रदातारः स्युस्तेषामेव प्रतिष्ठां कुरुत॥ १॥

पदार्थः—हे (होतः) दानकर्त्ता (अग्ने) अग्नि के सदृश विद्वान् (हि) जिससे (त्वम्) आप (देवताता) विद्वानों की पङ्क्ति में (यजीयान्) अत्यन्त यजन करने वाले (नः) हम लोगों के (अध्वरस्य) नहीं हिंसा करने योग्य

धर्मयुक्त व्यवहार के ( ऊर्द्ध्वः ) ऊपर अधिष्ठाताजन ( वेधसः ) बुद्धिमान् विद्वान् के सम्बन्ध में ( विश्वम् ) सम्पूर्ण जगत् और ( मन्म ) विज्ञान के ( अभि ) सन्मुख ( असि ) होते और ( मनीषाम् ,चित् ) उत्तम बुद्धि ही के ( तिरसि ) पार होते हो ( उं, सु, प्र, तिष्ठ ) सो ही स्थित हूजिये ॥ १ ॥

भावार्थः—हे मनुष्यो जो लोग विद्वानों के समीप से विद्याओं को प्राप्त होकर सब के रक्षा करने और बुद्धि देने वाले होवें उन्हीं लोगों की प्रतिष्ठा करो ॥ १ ॥

अथ विदुषां कर्त्तव्यमाह ॥

अब विद्वानों के कर्त्तव्य को अ० ॥

**अमूरो होता न्यसादि विक्ष्वग्निर्मन्द्रो विदथेषु प्रचेताः ।**
**ऊर्ध्वं भानुं सवितेवाश्रेन्मेतेव धूमं स्तभायदुप द्याम् ॥ २ ॥**

अमूरः । होता । नि । असादि । विक्षु । अग्निः । मन्द्रः । विदथेषु । प्रऽचेताः । ऊर्ध्वम् । भानुम् । सविताऽइव । अश्रेत् । मेताऽइव । धूमम् । स्तभायत् । उप । द्याम् ॥ २ ॥

पदार्थः—(अमूरः) अमूढो विद्वान् सन् । अत्र वर्णव्यत्ययेन ढस्य रः (होता) आदाता ( नि ) ( असादि ) ( विक्षु ) प्रजासु ( अग्निः ) पावक इव ( मन्द्रः ) आनन्दप्रदः ( विदथेषु ) सङ्ग्रामेषु ( प्रचेताः ) प्राज्ञः प्रज्ञापकः ( ऊर्द्ध्वम् ) उपरिस्थम् ( भानुम् ) किरणम् ( सवितेव ) सूर्य्य इव ( अश्रेत् ) आश्रयेत् ( मेतेव ) प्रमातेव ( धूमम् ) ( स्तभायत् ) स्तभ्नाति ( उप ) ( द्याम् ) प्रकाशम् ॥ २ ॥

अन्वयः—मनुष्यैर्योऽमूरो होता विक्षु विदथेष्वग्निरिव मन्द्रः प्रचेता द्यामूर्द्ध्वं भानुं सवितेव धूमं मेतेव स्तभायन् न्यायमश्रेत् स एव राज्यकर्म्मण्युपन्यसादि निषाद्येत तर्हि पुष्कलं सुखं प्राप्येत ॥ २ ॥

भावार्थः—अत्रोपमालं०—यदि मनुष्याः सूर्य्यवत्प्रतापिनमग्निवद् दुष्टप्रदाहकं न्यायविनयाभ्यां प्रजासु चन्द्र इव संग्रामे विजेतारं राजानं संस्थापयेयुस्तर्हि कदाचिद्दुःखं न प्राप्नुयुः ॥ २ ॥

पदार्थः—मनुष्यों को चाहिये कि जो ( अमूरः ) मूर्खपन से रहित विद्वान् जन होता हुआ ( होता ) ग्रहण करने वाला ( विक्षु ) प्रजाओं और ( विदथेषु )